इत्यादीनि सर्वाण्यपि रूपाणि तद्धातूपात्तविशेषरूपाणि विना भौवादिककलतिवत् (174) ज्ञेयानि । [1]बालः-बलः, [2]बाला, [3]बाहुबली-ऊरुबली, सर्वबली, [4]बलिः, [5]बलवान्-बली, [6]बलूलः, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1104) " बल प्राणने " (X-चुरादिः-1629. सक. सेट्. उभ.) ज्ञपादिः।
बलकः-लिका, बिबलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचहयतिवत् (515) ज्ञेयानि । [A]बलयन्-न्ती ।

(1105) " बल्ह प्राधान्ये " (I-भ्वादिः-639. अक. सेट्. आत्म.)
बल्हकः-ल्हिका, बल्हकः-ल्हिका, बिबल्हिषकः-षिका, बाबल्हकः-ल्हिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्हतिवत् (385) ज्ञेयानि । [B]प्रबल्हः, [7]बाह्लीकः ।

(1106) " बल्ह भाषार्थः " (X-चुरादिः-1771. सक. सेट्. उभ.)
आस्वदीयः ।
बल्हकः-ल्हिका, बिबल्हयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि

---

1. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि वा णप्रत्ययः । तदभावपक्षे पचाद्यचि बलः इति रूपम् ।
2. बालशब्दस्याजादिषु (4-1-4) पाठात् ' वयसि प्रथमे ' (4-1-20) इति ङीप् न, टाबेव भवति ।
3. ' बलाद् बाहूरुपूर्वपदात्, सर्वादेश्च ' (वा. 5-2-135) इति वचनात् मत्वर्थीय इनिप्रत्यये रूपाण्येतानि साधूनि ।
4. ' इन् ' [द. उ. 1-46] इतीन्प्रत्यये रूपम् ।
5. मत्वर्थीये इनिप्रत्यये, मतुपि मतोर्वकारे च एते रूपे भवतः ।
6. ' वातदन्तबलललाटानामूङ् च ' (ग. सू. 5-2-97) इति सिध्मादिषु पाठात् मत्वर्थीये लच्प्रत्यये ऊङागमे च रूपमेवम् ।
7. ' ईकक् च ' (वा. 4-1-85) इत्यनेन बहिस्-बहिल्शब्दाभ्यामीकक्प्रत्यये टिलोपे च बाह्लीकः इति रूपसिद्धिः। वेदबाह्यदेशजात इत्यर्थः । ' गौर्वाह्लीकः ' इत्यादिषु बाह्लीकः इत्येव ओष्ठ्यादिः प्रयोगः साधुः, न तु दन्त्योष्ठ्यादिरिति बोध्यम् ।

A. ' युध्यस्व भीतिरहितो बलयन् खलु त्वं
कीर्तिं चयस्व चपयापि नृपप्रसादम् ॥' धा. का. 3.25.

B. ' बर्हप्रबल्हसमलङ्कृतिरालिलिङ्ग
प्रोत्थाप्य बर्हकनिबल्हहृतं तमीशः । ' धा. का. 1.81.